संस्कार
कुं.कं ८४

याज्ञिक
विधि

भागीरथीगङ्गाआनीत उदकस्नानाचीविधि:

ल

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

(1)

श्रीगणेशायनमः ॥ भागीरथीगृहानीतउदकस्नानविधिः ॥ नित्यकर्मनिवर्त्य । शुभेह्निः ।
पर्वपुण्यकालेषुतेषुपवित्रस्थानानीतेगांगदीनांभांडमादि अथपात्रेस्वाग्रभागेपीठोपरिरंगव
ल्ल्याद्यलंकृतेदेशे आचम्य पवित्रपाणिःसुमुखश्चेत्यादिमंत्रेण जन्मजन्मांतरादिषुवाङ्मनः
कायकर्मणांसकृदभ्यस्तानांसर्वपातकोपपातकलघुपातकगुरुपापानांसर्वेषां
निरासार्थंकरिष्यमाणगंगास्नानाधिकारार्थंयथासंभवंप्रायश्चित्तंविधाय पुनः
सुमुखश्चेत्यादि० निरासंपूर्वकंश्रीविश्वेश्वरस्यानुग्रहप्राप्तिकामोहंश्रीपरमेश्वरप्री
त्यर्थंगृहानीतेनोदकेनगंगाजलेनस्नानमहंकरिष्ये । तत्रादौनिर्विघ्नतायैगणे
शपूजनपूर्वकंगंगापूजनंचकरिष्ये । तत्रपूजनादि० पूजाआरंभ्या ॥ ध्यानं ॥
चतुर्भुजांत्रिनेत्रांचसर्वावयवशोभितां । रत्नकुंभसितांभोजवरदाभयसत्करां । श्वे
तपट्टपरीधानांमुक्तामणिविभूषितां । ततोध्यायेत्सुसौम्यांचचंद्रायुतसमप्रभां । चा
मरैर्वीज्यमानांचश्वेतच्छत्रोपशोभितां । सुप्रसन्नांचवरदांकरुणार्द्रनिरांतरां । सु
धाप्लावितभूपृष्ठांआर्द्रगंधानुलेपनां । त्रैलोक्यनमितांगंगांदेवादिभिरभिष्टुतां । दिव्यर

(2)

गंगा स्नान विधि

नविभूषांच दिव्यमाल्यानुलेपनां। इति ध्यात्वा। इमं मे गंगे इति अनेन मंत्रेण षोडशोपचारैः
पु० स्त्री चेत् पौराण मंत्रेण। नमो गंगे महागंगे महादेवस्य वल्लभे। महती त्वं महादेवी भा
गीरथि नमोस्तुते। अनेन मंत्रेण गंधाक्षतानुपचारान् समर्प्य। हरिद्रा कुंकुम कज्जल कंठसूत्र ता
डपत्रादि यथासंभव मलंकारं समर्प्य नमस्कृत्य शरणं गत्वा। नमामि गंगे तव पादपंक
जं सुरासुरैर्वंदितदिव्यरूपं। भुक्तिं च मुक्तिं च ददासि रूपं भावानुसारेण सदा नराणां। नम
स्कारं० विशेषार्घ्यं। ततः ताम्रादिमये पात्रे गंध पुष्पाक्षत यव कुश तिल सर्षप दू
र्वायुतं जलं गृहीत्वा। गृहाणार्घ्यं मया दत्तं गंगे त्रिपथगामिनी। सर्वपापक्षयं कृत्वा
मामुद्धर जगन्मये॥ गंगे त्वं सर्वरूपासि सर्वपापविनाशिनी। रूपिणी त्वं जग
न्मूर्ति मामुद्धर समुद्रगे। स्वर्गे मंदाकिनी देवी पाताले भोगवत्यपि। भागीर
थीति भूर्लोके गृहाणार्घ्यं नमोस्तुते। इत्यर्घ्यं दत्वा साष्टांगं प्रणम्य। स्नानदेशं २
गत्वा तज्जलेन स्नानं कुर्वन् जपेत्। नंदिनी नलिनी सीता मालती च मलापहा।
विष्णुपादाब्जसंभूता गंगा त्रिपथगामिनी। भागीरथी भोगवती जान्हवी त्रि

Rajawade Sanshodhan Mandal, Dhule and the ...

२८

दत्तोभ्वरी।। गांगवारि मनोहारि मुरारिचरणच्युतं। त्रिपुरारि शिरश्चारि पापहारि पु
नातु मां। पापहारि दुरितारि तरंगधारी शैलप्रचारि गिरिराजगुहाविहारि।। झंका
रकारि हरिपादरजोपहारी गांगं पुनातु सततं शुभकारि वारि। इति पठन्न स्ना
त्वा। तेनैव जलेनाचम्य वाससी परिधाय।। अच्युतोहं मनंतोहं गोविंदोहमथुं हरिः।
आनंदोहमशेषोहमजोहममृतोस्म्यहं।। नित्योहं निर्विकल्पोहं निराकारोहम
व्ययः। इति भावयित्वा शक्ति संभवे गोदानं सुवासिन्यै सौभाग्यवायनं विप्रेभ्यो
भूयसीं दत्वा। यथासंभवं ब्राह्मणान् भोजयेत्।। विष्णुं स्मरेत्।। १।८।। ।।

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

## मूळ प्रत पाहण्यासाठी संपर्क

---

**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com